वह्निर्नास्ति तत्र धूमोऽपि नास्तीति व्यतिरेकव्याप्तिः, यथा महानसादौ। –लौ. न्याय; आकृतिज्ञानसत्त्वे व्यक्तिज्ञानम्, आकृतिज्ञानाभावे व्यक्तिज्ञानाभाव इति आकृतिरेव शब्दार्थः, न व्यक्तिः। एवं प्रीतिसत्त्वे स्वर्गशब्दप्रयोगः, प्रीत्यभावे न इति प्रीतिरेव स्वर्गशब्दवाच्या। –मी. को.

**अपवादैरुत्सर्गा बाध्यन्ते** General rules are set aside by special ones. cf. Mbh. 2. 1. 24; लब्धप्रतिष्ठाः प्रथमं यूयं किं बलवत्तरैः। अपवादैरिवोत्सर्गाः कृतव्यावृत्तयः परैः॥ Ku. 2. 27; यः कश्चन रघूणां हि परमेकः परंतपः। अपवाद इवोत्सर्गं व्यावर्तयितुमीश्वरः॥ R. 15. 7.

**अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति** A co-uterine brother leaves a person following a wrong ( dangerous, impious ) path. The general golden rule is महाजनो येन गतः स पन्थाः।. One who does not follow this rule becomes a heretic, an atheist. cf. यान्ति न्यायप्रवृत्तस्य तिर्यञ्चोऽपि सहायताम्। अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति॥ Ram.; A. R.; अपथे पदमर्पयन्ति हि श्रुतवन्तोऽपि रजोनिमीलिताः॥ R. 9. 74.

**अपराह्णच्छायान्यायः** The maxim of the shadow in the latter half of the day. In the afternoon the shadow of the sun is underneath our feet while towards evening it goes on lengthening. The case is quite the reverse from the sunrise till midday. आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात्। दिनस्य पूर्वार्धपरार्धभिन्ना छायेव मैत्री खलसज्जनानाम्॥ The maxim is used to illustrate the nature of friendship of the good and the wicked.

**अप्राप्ते शास्त्रमर्थवत्** Scripture becomes purposeful when an injunction has not been enjoined by any other scriptural injunction. तथाहि–'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति श्रुतिः।, अत्र श्रोतव्य इत्यनुवादः। ( स्वाध्यायोऽध्येतव्यः इति ) अध्ययनविधिना साङ्गस्य स्वाध्यायस्य ग्रहणे अधीतवेदस्य पुरुषस्य प्रयोजनवदर्थदर्शनात्। तन्निर्णयाय स्वरसत एव श्रवणे प्रवर्तमानतया तस्य प्राप्तत्वात्। मन्तव्य इति चानुवादः श्रवणप्रतिष्ठार्थत्वेन मननस्यापि प्राप्तत्वात्। लौ. न्याय.; प्रमाणान्तरसिद्धस्य न शास्त्रविषयत्वम्। सिद्धान्तचन्द्रिका 1. 1. 1.

**अब्धिफेनादिन्यायः** The maxim of the superimposition of the name and form of foam etc. on the ocean. cf. सृष्टिर्नाम ब्रह्मरूपे सच्चिदानन्दरूपवस्तुनि। अब्धौ फेनादिवत् सर्वनामरूपप्रसारणम्। न्यायरूपदृष्टान्तमाह – अब्धौ फेनादिवदिति। अब्धौ अवस्थिताया विक्षेपात्मिकाया मायायास्तत्रैव फेनतरङ्गबुद्बुदाकारेण विवर्तनं सृष्टिशब्देनोच्यते, तथात्रापीति भावः। –लौ. न्याय.; आवर्तबुद्बुदतरङ्गमयान् विकारानम्भो यथा सलिलमेव हि तत् समस्तम्। U. 3. 47. The maxim is used to illustrate the विवर्तवाद of the Advaita Vedānta.

**अभ्यन्तरे हि समुदायेऽवयवे इति न्यायः** The maxim of the application to the part when it is applicable to the whole thing. When a tree moves by the force of wind the branches of it also move without fail. समुदायेषु हि शब्दाः प्रवृत्ता अवयवेष्वपि वर्तन्ते। तद्यथा, पूर्वे पञ्चालाः, उत्तरे पञ्चालाः, तैलं भुक्तम्, घृतं भुक्तम्, शुक्लः, नीलः, कृष्ण इति। एवमयं समुदाये व्याकरणशब्दः प्रवृत्तोऽवयवेऽपि प्रवर्तते। लौ. न्याय.

**अभ्यर्हितं पूर्वम्** That which is more worthy should come first. The origin of the maxim is in Mb. 2. 2. 34. ( अभ्यर्हितं पूर्वं निपततीति वक्तव्यम्। मातापितरौ श्रद्धामेधे। ) However, it is extended to other fields. cf. ऋग्वेदस्य प्राथम्येन सर्वत्राम्नातत्वादभ्यर्हितं पूर्वमिति न्यायेनाभ्यर्हितत्वात् तद्व्याख्यानमादौ युक्तम्। Sāyaṇa's Intro.to Ṛv.; अभ्यर्हितं पूर्वमिति न्यायमाश्रित्य तन्त्रप्रसंगप्रतिपादकयोरेकादशद्वादशाध्याययोः पूर्वोत्तरभाव उपपादितः। J. N. V. 12.

**अभ्युपगमसिद्धान्तन्यायः** The rule of an implied axiom or a dogmatic corollary. This is an admitted proposition in the न्यायदर्शन. A corollary, though not explicitly stated, follows the statement of aphorism so as to render a demonstration of the corollary superfluous.

**अम्बुनि मज्जन्त्यलाबूनि ग्रावाणः प्लवन्ते** Gourds sink in water, but stones float. This maxim is used to illustrate an obvious absurdity which is opposed to the direct proof ( प्रत्यक्षप्रमाण ). cf. मज्जन्त्यलाबूनि शिलाः प्लवन्ते मुह्यन्ति नावोऽम्भसि शश्वदेव। Mb. 2. 66 :11; एवंजातीयकं प्रमाणविरुद्धं वचनमप्रमाणम्। अम्बुनि मज्जन्त्यलाबूनि ग्रावाणः प्लवन्त इति यथा। ŚB. on MS. 1. 1. 5; 4. 3. 16.

**अयमपरो गण्डस्योपरि स्फोटः** Here is another boil on the top of a previous one! An illustration of difficulty upon difficulty, another evil to add to the first. This is a proverbial phrase to express the sense of the English proverb 'to add misery to misfortune'. cf. तदो गंडस्स उवरि पिंडओ संवुत्तो। Ś. 2; Mu. 5; विद्धशालभञ्जिका 1. The maxim stands for a series of misfortunes ( दुःखपरंपरा ).

**अयस्कान्तन्यायः** The maxim illustrates as to how the inactive, passive पुरुष is drawn into activity. अयमुदासीनत्वे कर्मप्रवर्तकत्वविवक्षायामवतरति। यथा कूटस्थोऽध्यक्षोऽयस्कान्तकल्पः प्रवर्तकः सन् चराचरं जगदुत्पादयति, तथा प्रकृतेऽपि बोध्यम्। लौ. न्याय. Iron is inactive but it is drawn towards itself by the magnet.

**अयाचितमण्डनन्यायः** The favourites of God, though penniless, get wealth due to God's grace. अजगरप्रवर्तनवद् याच्ञां विनैव लब्धं वस्तुविशेषमयाचितमित्युच्यते।... अयाचितं च तन्मण्डनं चेति समासः। यथा ईश्वरसुहृदः स्वयं निर्धना अपि तदीयेन धनेन फलभाजः। तद्वद् यत्र व्यवहारस्तत्रास्य प्रवृत्तिः। लौ. न्याय.

**अरण्यचन्द्रिकान्यायः** The maxim of the moonlight in the forest. It illustrates the uselessness of an object of enjoyment without the presence of an enjoyer. निनिन्द रूपं हृदयेन पार्वती प्रियेषु सौभाग्यफला हि चारुता। Ku. 5. 1; स्त्रीणां प्रियालोकफलो हि वेषः।

**अरण्यरोदनन्यायः** The simile of crying in the wilderness. There is no person in wild region to pay attention to the wailing cry of a bereaved person, none to console or sympathise; hence it becomes useless. cf. अन्धदर्पणन्याय, ऊषरवृष्टिन्याय etc. अरण्यरुदितं कृतं शवशरीरमुद्वर्तितं स्थले कमलरोपणं सुचिरमूषरे वर्षितम्। श्वपुच्छमवनामितं बधिरकर्णजापः कृतः कृतान्धमुखमण्डना यदबुधो जनः सेवितः॥ Pt.

**अरुन्धतीप्रदर्शनन्यायः** The maxim of pointing out of the star अरुन्धती. It is used to illustrate the principle